# अकथितानां कर्मसंज्ञा अर्थनिबन्धना

- **अकथितं च** इति विधीयमाना कर्मसंज्ञा **दुह्-याच्-पच्.....**
  **इत्यादि**धातुभिः निर्धारिता भवति, तत्र चोक्तम्-
- **अर्थनिबन्धनेयं संज्ञा**
- **अर्थात्**- दुहादिधातूनामेव इति न, अपितु तदर्थानां सर्वेषां धातूनां कर्मणा यद् युक्तं, तादृशस्य सर्वस्यापि अकथितस्य कर्मसंज्ञां करोति सूत्रमिदम्।
- **उदाहरणानि**-

  बलिं भिक्षते वसुधाम्। भिक्ष्धातुः याचनार्थकः

  माणवकं धर्मं भाषते, अभिधत्ते वक्ति इत्यादि।
- **कारकस्यैव इयं कर्मसंज्ञा, अतः** -

  माणवकस्य पितरं पन्थानं पृच्छति।

# अकर्मकधातूनां योगे कर्मसंज्ञा

**वा. अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्म इति वाच्यम्।**

**कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः।**
**सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते॥**

- इदं वार्तिकम् अकर्मकाणाम् अपि धातूनां योगे देशवाचिनः, समयवाचिनः, क्रियावाचिनः, गन्तव्यमार्गवाचिनश्च कर्मसंज्ञां विदधाति।
- उदाहरणानि :-

1. कुरून् (व्याप्य) स्वपिति। 2. मासम् (व्याप्य) आस्ते।
3. गोदोहम् (व्याप्य) आस्ते। 4. क्रोशम् (व्याप्य) आस्ते।

# अकर्मकधातूनां संग्रहः

लज्जासत्तास्थितिजागरणं
वृद्धिक्षयभयजीवितमरणम्।
शयनक्रीडारुचिदीप्त्यर्थं
धातुगणं तमकर्मकमाहुः॥

श्लोकं पठामः

# अन्यपूर्वकं कर्म

**गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णौ**

गति–बुद्धि–प्रत्यवसानार्थकानाम्, शब्दकर्मणाम्, अकर्मकाणां च अण्यन्तावस्थायां यः कर्ता, स णौ कर्मसंज्ञको भवति।

**प्रत्यवसानम् = भोजनम्**
**शब्दकर्माणः = शब्द एव कर्म येषां, तादृशा धातवः**

**उदाहरणानि–**

शत्रूनगमयत् स्वर्गं वेदार्थं स्वानवेदयत्।
आशयच्चामृतं देवान् वेदमध्यापयद्विधिम्।
आसयत्सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः॥

१. शत्रवः स्वर्गम् अगच्छन्, तान् श्रीहरिः प्रैरयत् –

श्रीहरिः शत्रून् स्वर्गम् अगमयत्।

२. स्वे वेदार्थम् अविदुः, तान् श्रीहरिः प्रैरयत् –

श्रीहरिः स्वान् वेदार्थम् अवेदयत्।

३. देवाः अमृतम् आश्नन्, तान् श्रीहरिः प्रैरयत् –

श्रीहरिः देवान् अमृतम् आशयत्।

४. विधिः वेदम् अध्यैत, तम् श्रीहरिः प्रैरयत् –

श्रीहरिः विधिं वेदमध्यापयत्।

५. पृथ्वी सलिले आस्त, ताम् श्रीहरिः प्रैरयत् –

श्रीहरिः पृथ्वीं सलिले आसयत्।

# सूत्रस्य पदकृत्यम्

**गति...इत्यादि किम्?**

रमेशः देवदत्तेन ओदनं पाचयति।

देवदत्तः ओदनं पचति।

**अणयन्तानां किम्?**

यज्ञदत्तः गच्छति

देवदत्तः यज्ञदत्तं गमयति।

विष्णुमित्रः देवदत्तेन यज्ञदत्तं गमयति।

**बुद्ध्यर्थकाः नाम?**

ज्ञानसामान्यार्थकाः, न तु तत्तद्–विशेषार्थकाः।

**अत्र अकर्मकाः नाम?**

येषां देशकालादिभिन्नं कर्म न सम्भवति, ते, न तु विवक्षितकर्माणः।

# गतिबुद्धि. सूत्रे वार्तिकानि

**नीवह्योर्न** – नाययति वाहयति वा भारं भृत्येन।

**नियन्तृकर्तृकस्य वहेरनिषेधः** – वाहयति रथं वाहान् सूतः।

**आदिखाद्योर्न** – आदयति खादयति वान्नं वटुना।

**भक्षेरहिंसार्थस्य न** – भक्षयत्यन्नं वटुना।

अहिंसार्थस्य किम्? भक्षयति बलीवर्दान् सस्यम्।

**जल्पतिप्रभृतीनामुपसंख्यानम्** – जल्पयति भाषयति वा धर्मं पुत्रं देवदत्तः।

**दृशेश्च** – दर्शयति हरिं भक्तान्।

**शब्दायतेर्न**– शब्दाययति देवदत्तेन।